# Sri Rama Pancha Ratna Stotram

कंजातपत्रायत लोचनाय कर्णावतंसोज्ज्वल कुंडलाय
कारुण्यपात्राय सुवंशजाय नमोस्तु रामायसलक्ष्मणाय
॥ 1 ॥

विद्युन्निभांभोद सुविग्रहाय विद्याधरैस्संस्तुत सद्गुणाय
वीरावतारय विरोधिहर्त्रे नमोस्तु रामायसलक्ष्मणाय ॥
2 ॥

संसक्त दिव्यायुध कार्मुकाय समुद्र गर्वापहरायुधाय
सुग्रीवमित्राय सुरारिहंत्रे नमोस्तु रामायसलक्ष्मणाय ॥
3 ॥

पीतांबरालंकृत मध्यकाय पितामहेंद्रामर वंदिताय
पित्रे स्वभक्तस्य जनस्य मात्रे नमोस्तु
रामायसलक्ष्मणाय ॥ 4 ॥

नमो नमस्ते खिल पूजिताय नमो नमस्तेंदुनिभाननाय
नमो नमस्ते रघुवंशजाय नमोस्तु रामायसलक्ष्मणाय ॥
5 ॥

इमानि पंचरत्नानि त्रिसंध्यं यः पठेन्नरः
सर्वपाप विनिर्मुक्तः स याति परमां गतिं ॥

इति श्रीशंकराचार्य विरचित श्रीरामपंचरत्नं संपूर्णं

eAstroHelp
Your Astrology Helpline